# নববর্ণমালা

{॥ নববর্ণমালা ॥}

॥শ্রীঃ॥

॥ শ্রী সদাশিবব্রহ্মেন্দ্রবিরচিতা ॥

ওংকারৈকনিরূপ্যং পঙ্কজভবনাদিভাবিতপদাব্জম্ ।

কিংকরকৈরবশশিনং শংকরমেকং কলযে॥ ১ ॥

ঐন্দ্রং পদমপি মনুতে নৈব বরং যস্য পদরজঃস্পর্শাত্ ।

সান্দ্রসুখোদধিমেকং চন্দ্রকলোত্তংসমীশমাসেবে॥ ২ ॥

নাগেশকৃত্তিবসনং বাগীশাদ্যৈকবন্দিতাঙ্ঘ্রিযুগম্ ।

ভোগীশভূষিতাঙ্গং ভাগীকৃতসর্বমঙ্গলং নৌমি॥ ৩ ॥

নগরাজশিখরবাসিনং অগজামুখকুমুদকৌমুদীনিকরম্ ।

গগনশিরোরুহমেকং নিগমশিরস্তন্ত্রবিদিতমবলংবে॥ ৪ ॥

মন্দস্মিতলসদাননং ইন্দুকলোত্তংসমম্বিকাসচিবম্ ।

কংদর্পকোটিশতগুণ-সুন্দরদিব্যাকৃতিং শিবং বন্দে॥ ৫ ॥

মস্তক নম কমলাংঘ্রিং সংস্তুহি ভো বাণি বরগুণোদারম্ ।

হস্তযুগার্চয শর্বং স্বস্থো নিবসামি নিজমহিম্ন্যমুনা॥ ৬ ॥

ক্লিন্নেক্ষণমতিকৃপযা সংনুতমহিমানমাগমশিরোভিঃ।
তং নৌমি পার্বতীশং পন্নগবরভূষণোজ্জ্বলকরাব্জম্॥ ৭ ॥

বটবিটপিনিকটনিলযং কুটিলজটাঘটিতহিমকরোদারম্।
কটিলসিতকরটিকৃত্তিং নিটিলাম্বকমেকমালংবে॥৯ ॥

বামাঙ্ককলিতকান্তং কামান্তকমাদিদৈবতং দান্তম্।
ভূমানন্দঘনং তদ্ধাম কিমপ্যন্তরান্তরং ভাতি॥ ১০ ॥

যদপাঙ্গিতাৎপ্রবোধাৎপদমলভেঽখণ্ডিতাত্মমাত্রমহম্।
সদযং সাংবশিবং তং মদনান্তকমাদিদৈবতং নৌমি॥ ১১ ॥

সৌস্নাতিকমমৃতজলৈঃ সুস্মিতবদনেন্দুসমুদিতদিগন্তম্।
সংস্তুতমমরগণৈস্তং নিস্তুলমহিমানমানতোঽস্মি শিবম্॥ ১২ ॥

নববর্ণমালাস্তুতিমেতামাদিদেশিকেন্দ্রস্য।
ধারযতঃ স্যাদ্ভুক্তিঃ সকলকলাবাপ্তিরথ পরা মুক্তিঃ॥ ১৩ ॥

॥ ইতি শ্রী সদাশিবব্রহ্মেন্দ্রবিরচিতা নববর্ণমালা সংপূর্ণা॥

Endoded by N. Balasubramanian bbalu@satyam.net.in

Please send corrections to sanskrit@cheerful.com

Last updated ৃoday

http://sanskritdocuments.org

Navavarnamala Lyrics in Bengali PDF
% File name : navarNamAlA.itx
% Category : varNamAlA
% Location : doc_shiva
% Author : sadAshivabrahmendra
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : N.Balasubramanian bbalu at satyam.net.in
% Proofread by : N.Balasubramanian bbalu at satyam.net.in
% Latest update : June 22, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website